चमत्कारविचारचर्चा

(चमत्कारसम्प्रदायप्रतिपादिनी कारिकावली)

लेखकः
प्रो० रामप्रताप वेदालङ्कार
पूर्वाचार्य एवं अध्यक्ष
संस्कृत-विभाग
जम्मूविश्वविद्यालय, जम्मू तवी

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्
साधु-आश्रमः, होश्यारपुरम्-१४६०२१ (पंजाब)
२००४

विश्वेश्वरानन्द - वैदिक - शोध - संस्थान - प्रकाशनम्

वुल्नर भारतभारती–ग्रन्थमाला–26

Vishveshvaranand Vedic Research Institute Publication

चमत्कारविचारचर्चा

(चमत्कारसम्प्रदायप्रतिपादिनी कारिकावली)

लेखक:

प्रो० रामप्रताप वेदालङ्कार

पूर्वाचार्य एवं अध्यक्ष

संस्कृत–विभाग

जम्मूविश्वविद्यालय, जम्मू तवी

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्

साधु-आश्रमः, होशयारपुरम्-१४६०२१ (पंजाब)

२००४

प्रकाशकृत्

विश्वेश्वरानन्द - वैदिक - शोध - संस्थानम्

साधु - आश्रमः, होश्यारपुरम्

मूल्यम् : 80—

प्रथमसंस्करणम्, २००४

प्रो० इन्द्रदत्त उनियाल द्वारा वी० वी० आर० आई० प्रैस, साधु-आश्रम, होश्यारपुर (पञ्जाब, भारत) में मुद्रित एवं प्रकाशित

Printed and Published by Prof. I. D. Uniyal, at the V. V. R. I. Press, Sadhu Ashram, Hoshiarpur (Pb. India)

पुरोवाक्

काव्यशास्त्रस्याध्ययनावसरे स्वभावतः मनस्येतदवगन्तुमौत्सुक्यं जायते यत् किमस्ति काव्ये तत्तत्त्वं यत्पाठकान् कस्मिन्नपि सुधासिन्धौ निमज्जयत्तथाह्लादयति यथाऽसावमन्दमानन्दं लभमानो योगीव ब्रह्मसहोदरतामधिगच्छति। येन विना च काव्ये काव्यत्वमपि न संभवति। यथा जगति शरीरजातं नात्मतत्त्वमन्तरावस्थातुमर्हति न च तस्यास्तित्वमपि भवति तद्वत् काव्येऽपि तादृशं तत्त्वमवश्यमेव भवेद् यदात्मनिभं सत् काव्यस्य शरीर-भूतयोः शब्दार्थयोः सौन्दर्यमाकर्षणमाह्लादकत्वञ्च जनयति, यद्विना काव्यस्य काव्यत्वमपि विहन्येत।

भारतीयदर्शनस्यात्मतत्त्वस्यानुभव एव यथा परमं प्रयोजनं मोक्षप्राप्तिश्च चरमं श्रेयः, तद्वत् काव्यशास्त्रेऽप्यात्मतत्त्वान्वेषणं तस्यानुभवश्च काव्यस्य परमं प्रयोजनं प्रत्यपादि प्राचीनैर्नवीनैश्च काव्याचार्यैः 'रसो वै सः' रसं ह्येवायं लब्ध्वानन्दीभवति इति श्रुतेर्वचनात् काव्यनाटकाभ्यां रसास्वादस्यानुभवसिद्धत्वाच्च। काव्यशास्त्रस्यारम्भादेवाऽऽचार्याः तत्तत्त्वान्वेषणपरा बभूवुः। फलतोऽनेकैराचार्यैः स्वस्वविचारानुरूपमेव तत्तत्त्वस्य मानन्नं स्वीकुर्वद्भिः विभिन्नतया तस्य स्वरूपस्य निर्धारणमकारि, तेन नैकाः सम्प्रदायाः सममेव समुद्भूताः। आचार्यभरतेन तदुत्तरवर्तिभिः काव्यतत्त्वान्वेषणपरैराचार्यैश्च स्वीकृतेष्वप्यनेकेषु तत्त्वेष्वेकमेव तत्त्वमात्मरूपममन्यत, तद्यथा केचन् अलङ्कारान्, अपरे रीतिम्, इतरे गुणान्, परे वक्रोक्तिम्, अन्ये औचित्यम्, कतिपये ध्वनिम्, अन्यतरे रसम् एव काव्यस्यात्मानं स्वीचक्रुः। एवं काव्यगत-विभिन्नतत्त्वानामात्मरूपेण प्राप्यतया काव्यात्मस्वरूपप्रतिपादनपरम्परायामनेके सम्प्रदायाः सम्प्रति समवलोक्यन्ते। ते चेत्थं भवन्ति —

(१) अलङ्कारसम्प्रदायः	(४) ध्वनिसम्प्रदायः
(२) रीतिसम्प्रदायः	(५) औचित्यसम्प्रदायः
(३) वक्रोक्तिसम्प्रदायः	(६) रससम्प्रदायः।

समुपस्थितासु विभिन्नासु विचारधारास्वौत्सुक्यं जायते चेतसि यत् किं तादृशं तत्त्वमलङ्कारादिष्वव्यक्तरूपेण निहितं सत् सामाजिकान् रसिकान्

सुधासागरे निमज्जयत् तथाह्लादयति यथा ते अमन्दानन्दं लभमाना न जातुचित् काव्यं व्रतं हातुमिच्छन्ति, तत्त्वञ्च तत् काव्याचार्यैः सहृदयहृदयैश्चमत्कृतिशब्देन व्यवह्रियते ।

चमत्कृतिश्चमत्कार इत्यनर्थान्तरं तेन चमत्कार एव तादृशं विशिष्टं तत्त्वं सर्वेष्वलङ्कारादिषु येनावच्छिन्नं शब्दार्थोभयशरीरभूतं काव्यं काव्यं जायते । अतः साहित्यविद्भिर्यद्यपि पुरा चमत्कारविषये समये समये मतं स्वकीयमुपस्थापितम् अनिवार्यत्वं च तस्य उद्घोषितं काव्यकृते । तेषां मते चमत्काररहिते सहृदयेऽपि कवौ न कवित्वं भवति, न च चमत्कारविहीनं काव्यं काव्यं भवति । यद्यपि पुरा कैश्चिदाचार्यैस्तत्त्वमिदं 'ग्रामं गच्छन् तृणं स्पृशति' वद् निरूपितम्, अन्यैश्चाऽऽमुक्तकण्ठेन विषयेऽस्मिन्नगादि । परन्तु परं चमत्कारोऽयं विद्यते यद् वेदशास्त्रपारङ्गतेन डॉक्टररामप्रतापेन चमत्कारस्य चमत्कृतिमवगच्छता पृथग्रूपेण चमत्कारसम्प्रदायस्य महता प्रयत्नेन स्थापनां कुर्वता सप्तमोऽयं चमत्कारसम्प्रदायः स्थापितः । तेनाधुना न केवलं षड् सम्प्रदाया अपितु सचमत्काराः सप्तसम्प्रदायाः विराजन्तेतराम् । काव्याचार्येणानेन कारिकासु चमत्कारसम्प्रदायस्य वैशिष्ट्यं प्रतिपादयता काव्यात्मत्वं च तस्य स्वीकुर्वता नैकान् भेदान् दर्शयता अलङ्कारादि-षड्सम्प्रदायानन्तरं सप्तमोऽयं चमत्कारसम्प्रदाय इति स्वीकुर्वता साहित्यशास्त्रस्य परम्परायां चमत्कारोऽकारि । अयं हि विद्वान् न केवलं तस्य लक्षणं कुर्वन् मौनमाकलयत्यपितु तस्य रसौचित्यादि दश भेदानपि स्वीकुर्वन् सप्तमोऽयं चमत्कार इति कथयन् सप्तमं चमत्कार-सम्प्रदायं साहित्यशास्त्रस्येतिहासे ख्यापयति ज्ञापयति च यन्नास्ति मदीयाऽन्यान् सम्प्रदायान्प्रति अनभिरुचिः परं चमत्कार-सम्प्रदायोऽवश्यमेवान्यैरपि मनीषिभिः विद्वद्भिः साहित्यिकैरभ्युपगमनीयः । यत्सत्यं सम्प्रति नूतनं सम्प्रदायमिमं षट्सु सम्प्रदायेषु योजयन् बुधवरोऽयं साहित्यशास्त्रस्य महान्तमुपकारमकरोत् । मार्गमेकमग्रेगन्तुं प्रशस्तमकरोत्, अन्ये च जिज्ञासवः तत्र गच्छन्तः मार्गं तं निष्कण्टकं कुर्वन्तः साहित्यशास्त्रस्य सेवामनायासेन करिष्यन्ति अन्यान् प्रेरयन्तः कारयिष्यन्ति चेति मे दृढो विश्वासः ।

इन्द्रदत्त उनियालः
सञ्चालकः
वि० वै० शोध-संस्थानम्, साधु-आश्रमः,
होश्यारपुरम् (पं०)

अपनी ओर से

ग्यारहवीं शती के आचार्य क्षेमेन्द्र से पहले संस्कृतकाव्यशास्त्र में रस, अलङ्कार, रीति, ध्वनि और वक्रोक्ति इन पांच काव्यसम्प्रदायों की स्थापना हो चुकी थी। आचार्य क्षेमेन्द्र ने औचित्यविचारचर्चा में औचित्य तथा कविकण्ठाभरण में चमत्कार-सम्प्रदाय का प्रतिपादन किया। भारतीय काव्यशास्त्र के प्राचीन आचार्य और समीक्षक औचित्यसहित छः सम्प्रदायों को तो मान्यता देते आये किन्तु सातवें चमत्कार सम्प्रदाय को समुचित महत्त्व नहीं दे पाये। समस्त संस्कृतकाव्यशास्त्र के उद्भव और विकास पर दृष्टिपात करने से यह तथ्य उभर कर सामने आता है कि काव्य एवं काव्यशास्त्र में चमत्कारतत्त्व एवं चमत्कारसम्प्रदाय का महत्त्व अन्य रसादितत्त्वों एवं सम्प्रदायों की तुलना में बिलकुल भी कम नहीं है। इस कारण इस सम्प्रदाय की गणना भी प्रधान काव्यसम्प्रदायों में की जानी चाहिए। इस चमत्कारसम्प्रदाय को सम्मिलित करके कुल सात काव्यसम्प्रदायों का अध्ययन और अध्यापन होना चाहिए।

विगत तीन दशकों में आधुनिक विद्वानों का ध्यान चमत्कार की ओर आकर्षित हुआ है। डा० वी० राघवन् (सम कन्सेप्ट्स ऑफ अलङ्कारशास्त्र) डा० महेश भारतीय (चमत्कार और काव्यानन्द), डा० कृष्णलाल शुक्ल (काव्यानन्द तथा चमत्कार), डा० रमेशचन्द्र लवानियां (चमत्कार सिद्धान्तः पुनर्विचार की आवश्यकता)—ये तीनों ही लेख—काव्यस्वरूप, सौन्दर्य एवं चमत्कार सम्पादक डा० महेश भारतीय गाज़ियाबाद १९८७ पुस्तकाकार में प्रकाशित) डा० मृदुला जोशी (संस्कृत काव्य परिभाषाओं का आलोचनात्मक अध्ययन) आदि विद्वानों और विदुषियों ने इस दिशा में कार्य किया है।

आचार्य बलदेव उपाध्याय ने चमत्कारवाद का समर्थन करते हुए कहा है— "कुन्तक भी इसी व्यापक चमत्कार के काव्य के उपासक हैं। उनकी वक्रोक्ति इसी चमत्कार का पर्याय है। व्यापक अर्थ में रस, औचित्य, ध्वनि, वक्रोक्ति, समस्त काव्यसार ही चमत्कार रूप है (भारतीयसाहित्यशास्त्र, भाग २)।" सम्भवतः चमत्कार विषय पर मेरे द्वारा लिखी हुई यह पहली रचना है जिसमें अनेक कारिकाओं द्वारा चमत्कार के स्वरूप को स्पष्ट करने का विनम्र प्रयास किया गया है।

सबसे पहले मैं विश्वेश्वरानन्द वैदिक शोध संस्थान, साधु-आश्रम, होशियारपुर के सुयोग्य सञ्चालक प्रो० इन्द्रदत्त उनियाल के प्रति अपना आभार प्रकट करता हूँ जिन्होंने चमत्कारविचारचर्चा नामक कारिकांश को संस्थान से प्रकाशित होने वाली त्रैमासिक पत्रिका विश्वसंस्कृतम् में क्रमशः प्रकाशित कर पुस्तक का आकार प्रदान किया है। इसका अग्रिम वचन (Foreword) लिखकर प्रो० वेदकुमारी ने इस लघुकृति को विद्वज्जनों के सम्मुख प्रस्तुत किया है। प्राचार्य डा० प्रियतमचन्द्र शास्त्री ने शुभाशंसा लिखकर मेरा उत्साहवर्धन किया है। विभिन्न शास्त्रों में निष्णात एवं साहित्य जगत् में ख्यातिप्राप्त इन दोनों महानुभावों के प्रति अपनी हार्दिक कृतज्ञता प्रकट करता हूँ।

अन्त में अपने साहित्यगुरु पं० काकाराम शास्त्री तथा श्रीद्विजेन्द्रनाथ मिश्र निर्गुण का स्मरण करते हुए प्राचीन काव्यशास्त्रविद् भरतादि आचार्यों को अपना मौन प्रणाम समर्पित करता हूँ।

१५ मार्च, २००४ रामप्रताप वेदालङ्कार

जम्मू तवी

शुभाशंसा

सहोदररसैः सार्धं कविताववनितायुतः ।
चमत्कारसुतं प्राप्य हृष्टः काव्यपुमानसौ ॥ १ ॥
जातं तु गौरवं तस्य चमत्कारप्रतिष्ठया ।
पुत्रे प्रतिष्ठिते जाते प्रतिष्ठां लभते पिता ॥ २ ॥
चमत्कारं विना काव्यं, न कदाचन शोभते ।
देहोऽप्येष विनात्मानं जुगुप्सां तनुते भृशम् ॥ ३ ॥
शब्देऽप्यसौ चमत्कारो ह्यर्थेऽप्यसौ चमत्कृतिः ।
शब्दार्थयुगले काव्ये तस्यैव स्थितिरिष्यते ॥ ४ ॥
ब्रह्मजातं जगत् सर्वं ब्रह्मणि लीयते यथा ।
रसादीनां स सङ्घातश्चमत्काराम्बुधौ तथा ॥ ५ ॥
काव्यस्यात्मा चमत्कारः काव्यसारश्चमत्कृतिः ।
लोकोत्तरमिदं तत्त्वं काव्ये कथमुपेक्ष्यते ॥ ६ ॥
सर्वेषां सम्प्रदायानां येनास्ति सम्प्रदायता ।
चमत्कारः कथं सोऽयं सम्प्रदायो न कथ्यते ॥ ७ ॥
योऽयं रामप्रतापोऽस्ति चमत्कारपरायणः ।
चमत्कारप्रतिष्ठायै तेन यत्नः कृतो महान् ॥ ८ ॥
रविः[1] काव्यप्रकाशेऽसौ ध्वनावभिनवस्तथा ।[2]
साहित्यस्य सुधासिन्धौ[3] मत्स्यो [4]जातो नवोऽपरः ॥ ९ ॥

---

१. काव्यप्रकाशीयमधुमतीटीकाकारो रविभट्टाचार्यः ।

२. ध्वन्यालोकस्य लोचनटीकाया रचयिता अभिनवगुप्तः ।

३. साहित्यसुधासिन्धुः (विश्वनाथदेवविरचितः, हिन्दी टीकाकारो रामप्रतापः) ।

४. मत्स्यावतारः ।

अस्य सूक्ष्मतरा बुद्धिर्दर्पणे[1] प्रतिबिम्बिता ।
जाता सकौतुका सैषाऽलङ्काराणां च कौस्तुभे[2] ॥ १० ॥

चमत्कारमयी जाता कवीनां कण्ठभूषणे ।[3]
गङ्गाधरे[4] प्रकाशे[5] सा प्रौढा तत्त्वार्थदर्शिनी ॥ ११ ॥

विचित्रा चित्रमीमांसा तत्र तस्य विचित्रता ।
नन्दः कुवलयानन्दस्तत्र नन्दति तन्मनः ॥ १२ ॥

औपम्यं पदलालित्यमर्थस्यापि च गौरवम् ।
एकत्र तस्य चर्चायां[6] मया दृष्टं निबन्धनम् ॥ १३ ॥

श्रीमद्रामप्रतापानामाचार्याणामिमां कृतिम् ।
बुधाः अधीत्य कुर्वन्तु स्वीयां प्रतिक्रियां शुभाम् ॥ १४ ॥

डा० प्रियतमचन्द्रशास्त्री
(पूर्वप्राचार्यः)
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरणवीरसंस्कृत परिसरः
जम्मू

---

१. साहित्यदर्पणः ।

२. कविकर्णपूरस्य अलङ्कारकौस्तुभः ।

३. क्षेमेन्द्रविरचितं कविकण्ठाभरणम् ।

४. रसगङ्गाधर ।

५. काव्यप्रकाशः ।

६. प्रस्तुतकृतिः चमत्कारविचारचर्चा ।

FOREWORD

Modern thinkers and critics of Sanskrit Poetics have classified the views of different ancient Āchāryas into following six schools as : (1) Rasa School, (2) Alaṅkāra School, (3) Rīti School, (4) Dhvani School, (5) Vakrokti School and (6) Auchitya School. These schools have been recognized and established on the basis of one element being considered as the soul of poetry, although other elements are not totally ignored. For example, in the Rīti School of Vāmana, Rīti is described as the soul of poetry while other elements are its subordinates. Bharata and many others regarded Rasa as the soul of poetry while Bhāmaha considered Alaṅkāra, Ānandavardhana Dhvani and Kuntaka Vakrokti respectively. Kṣhemendra by writing *Auchityavichāracharchā* emphasised the importance of Auchitya (Propriety) but in his another work *Kavikaṇṭhābharaṇa* he professed Chamatkāra as the most important element of poetry without which the existence of poet and poetry is not possible. Vishveshvara Kavichandra in his *Chamatkārachandrikā* pleaded emphatically the views propounded by Kṣhemendra.

Many other later writers like Paṇḍitarāja Jagannātha followed their path.

Though modern scholars of Indian Poetics have put forth many conflicting opinions and many interesting discussions regarding the most important element of poetry, not much has been written about Chamatkāra element. Almost every ancient Indian poetician (Āchārya) has mentioned this element directly or indirectly in his work. Even then modern scholars of Sanskrit Poetics have not given proper place to this seventh school of Sanskrit Poetics. Efforts of Prof. Ram Pratap must be appreciated in this respect as he has culled out the data about Chamatkāra from works of various ancient as well as modern writers and brought to light this hitherto forgotten chapter of Indian Poetics. He has also summarized the tenets of this school in one hundred and sixty five Sanskrit verses. I hope his work will be favourably received by students and scholars of Sanskrit Poetics alike.

VED KUMARI GHAI
Recipient, President's Certificate of Honour
Ex-Professor, H. O. D. (Sanskrit) Dean (Arts)
Jammu University

भूमिका

काव्य में चमत्कार तत्त्व

भरत से लेकर आधुनिक काल तक संस्कृत काव्यशास्त्र की सुदीर्घ परम्परा में चमत्कार सम्बन्धी विचारों का चिन्तन अनुचिन्तन अनवरत रूप से होता आ रहा है। इन विचारों को एकत्र करके आधुनिक अनुसन्धानात्मक पद्धति को अपनाकर उन्हें सुनियोजित रूप में पुनः प्रस्तुत करने की महती आवश्यकता है। रस, अलङ्कारादि विषयों पर तो अब तक बहुत कुछ लिखा जा चुका है किन्तु लगभग अछूते इस विषय पर लिखे जाने के लिए बहुत कुछ विपुल सामग्री प्राप्त होने की सम्भावना है और नये-नये तथ्यों के उद्घाटन होने की प्रबल आशा है।

जब किसी व्यक्ति के सामने सुन्दर वस्तु आती है तो उसे देखने के लिए कुतूहल और उत्सुकता होती है। जब वह उसे देख लेता है तो उसे परमानन्द मिलता है। सुन्दर वस्तु का जब काव्य में चित्रण होता है, तब उस काव्यगत सौन्दर्य से भी अनिर्वचनीय आनन्द की प्राप्ति होती है। इस सौन्दर्य तत्त्व को आचार्यों ने रमणीयता, विच्छित्ति, वैचित्र्य, चमत्कृति और चमत्कारादि पदों से अभिहित किया है। काव्य में यदि चमत्कार होता है तो आनन्द की प्राप्ति होती है और यदि चमत्कार नहीं होता तो आनन्द भी नहीं मिलता। चमत्कार का अर्थ विस्मय या कुतूहल तो है ही काव्यास्वाद भी है। रसनिष्पत्ति के प्रसङ्ग में आचार्य अभिनवगुप्त के मत को उद्धृत करते हुए आचार्य मम्मट ने बतलाया है कि शृङ्गारादि रस अलौकिक चमत्कार को उत्पन्न करने वाला होता है। इस प्रकार चमत्कार शब्द एक ओर काव्यसौन्दर्य का वाचक है तो दूसरी ओर काव्यानन्द का भी बोधक है।

महाकवि माघ ने कहा है—

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।

सच्ची सुन्दरता का रूप (लक्षण) वही है जो क्षण-क्षण में नवीनता को धारण करे। सुन्दर वस्तु में नयापन होता है और यह नयापन ही आनन्द प्रदान करता है।

ए थिंग ऑफ ब्यूटी इज ए जॉय फॉर ऐवर ।

सुन्दर वस्तु सदा ही आनन्ददायक होती है। उसको जब भी देखा जाये उसमें नयापन प्रतीत होता है और यह नयापन ही आनन्द का स्रोत है।

सामाजिक काव्य के श्रवण और नाट्य के प्रेक्षण से तभी आनन्दित होता है जब इनमें विद्यमान कथासूत्र में कुतूहल बना रहे। वास्तव में कुतूहल ही एक ऐसा तत्त्व है जो काव्य में सब भावों तथा सब रसों को एक सूत्र में बांधता है। काव्य और नाट्य में अन्य सब वस्तु, भाव और रस गौण हो जाते हैं और कुतूहल या चमत्कार की प्रधानता हो जाती है। वही काव्य, महाकाव्य, मुक्तक और नाटक प्रशंसा को प्राप्त करते हैं जिनमें चमत्कारोत्पादक सूक्तियां, भाव एवं रस समाविष्ट हों। प्रतिभावान् कवि मालाकार की भान्ति विविध भाव एवं रस रूपो पुष्पों को कुतूहल रूपी सूत्र में गूंथकर कविता रूपी माला बना देता है। यह सुन्दर माला सहृदय सामाजिक के कण्ठ को शोभा बनकर अपनी चमत्कार रूपी सुगन्धि को चारों ओर बिखेर देती है।

आचार्य क्षेमेन्द्र ने चमत्कार विरहित काव्य को अनाकर्षक और निरूपयोगी बताया है। उनका कहना है—

एकेन केनचिदनर्घमणिप्रभेण
काव्यं चमत्कृतिपदेन विना सुवर्णम् ।
निर्दोषलेशमपि रोहति कस्य चित्ते ।
लावण्यहीनमिव यौवनमङ्गनानाम् ॥[1]

---

१. कविकण्ठाभरण, तृतीय सन्धि, श्लोक २.

सुन्दर युवतियों का गोरे चिट्ट रंग रूप वाला किन्तु लावण्य (सौन्दर्य तत्त्व) से रहित तारुण्य जिस प्रकार अनाकर्षक होता है वैसे ही किसी एक ही बहुमूल्य रत्न की प्रभा के बिना थोड़े से भी खोट से युक्त सोना किस के चित्त में स्थान बनायेगा? और एक भी चमत्कार भरे पद के बिना थोड़े से भी दोष से रहित (सर्वथा निर्दोष) एवं सुन्दर वर्णावली से युक्त काव्य किसके चित्त को आकर्षित करेगा? अर्थात् किसी के भी चित्त को आनन्दित नहीं करेगा।

अभिप्राय यह है कि रत्नविहीन सुवर्णभूषण, सौन्दर्यहीन युवती का यौवन और चमत्कारहीन कवि का काव्य तीनों ही सामाजिकों को आनन्द नहीं दिया करते।

इस विवेचन से यह स्पष्ट हो जाता है कि काव्य और नाट्य में चमत्कार तत्त्व का विशेष महत्त्व है।

षट्काव्यसम्प्रदाय एवं चमत्कार सम्प्रदाय

काव्य की आत्मा क्या है? अर्थात् काव्य के भीतर ऐसा कौन-सा जीवनाधायक तत्त्व रहता है जो इसे इतिहासपुराणादि से पृथक् करता है। इसके सम्बन्ध में विभिन्न आचार्यों में मतभेद रहता आया है। काव्यात्मतत्त्व की मान्यता के आधार पर निम्नलिखित सम्प्रदाय प्रतिष्ठित होते आये हैं—

(१) रस सम्प्रदाय
(२) अलङ्कार सम्प्रदाय
(३) रीति सम्प्रदाय
(४) ध्वनि सम्प्रदाय
(५) वक्रोक्ति सम्प्रदाय
(६) औचित्य सम्प्रदाय।

अन्तिम षष्ठ सम्प्रदाय का आचार्य क्षेमेन्द्र ने प्रवर्तन किया था। उनके समय से लेकर आधुनिक काल तक संस्कृत-काव्यशास्त्र में उपर्युक्त छः सम्प्रदाय स्वीकार किये जाते रहे हैं। क्षेमेन्द्र ने औचित्यसम्प्रदाय के प्रतिपादन के साथ-साथ एक और नये चमत्कार-सम्प्रदाय की ओर भी सङ्केत कर दिया था किन्तु परवर्ती आचार्यों

ने बहुत समय तक उस ओर अपना ध्यान ही नहीं दिया। यद्यपि क्षेमेन्द्र ने औचित्यविचारचर्चा में औचित्य को चमत्कारकारी बतला कर औचित्य के महत्त्व को स्थापित किया था[1] किन्तु इससे उन्हें मन:सन्तोष नहीं प्राप्त हुआ तो उन्होंने कविकण्ठाभरण में नये सिरे से चमत्कार को कवि तथा काव्य के लिए अनिवार्य तत्त्व घोषित करते हुए कहा—

न हि चमत्काररहितस्य कवेः कवित्वं काव्यस्य वा काव्यत्वम्।[2]

चमत्काररहित कवि के भीतर कवित्व नहीं होता और चमत्काररहित काव्य के अन्दर भी काव्यत्व नहीं हुआ करता। उनकी यह भी धारणा है कि चमत्कार की उत्पत्ति में अक्षम कवि में कवित्व अर्थात् काव्यरचना की शक्ति प्रतिभा का ज्ञान नहीं होता।[3]

इस प्रकार आचार्य क्षेमेन्द्र ने अपनी प्रखर बुद्धि का उपयोग करके काव्य में दो नवीन सम्प्रदायों की स्थापना की। औचित्यविचारचर्चा में औचित्यसम्प्रदाय तथा कविकण्ठाभरण में चमत्कारसम्प्रदाय सम्बन्धी विचारों की चर्चा करके नये सम्प्रदाय को जन्म दिया। दैवदुर्विपाक से उत्तरवर्ती आचार्यों और समीक्षकों ने औचित्यसम्प्रदाय को स्वीकार करते हुए भी उसे अन्य सम्प्रदायों की तुलना में कम महत्त्वपूर्ण स्थान दिया है। और चमत्कारसम्प्रदाय की ओर तो ध्यान भी नहीं दिया है।

चौदहवीं सदी में क्षेमेन्द्र के परवर्ती आचार्य विश्वेश्वर कविचन्द्र ने सर्वप्रथम् चमत्कार को अपने काव्य-लक्षण में समाविष्ट किया—

वागर्थौ सचमत्कारौ काव्यं काव्यविदो विदुः।[4]

---

१. औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना॥
(औचित्यविचारचर्चा, तृतीय कारिका)

२. कविकण्ठाभरण ३. १, पृ० ७.

३. कविकण्ठाभरण, तृतीय सन्धि, पृ० ३६.

४. चमत्कारचन्द्रिका प्रथम विलास, पृ० २३.

चमत्कारयुक्त शब्द और अर्थ को काव्य के रूप में काव्य के विद्वान् जानते हैं। इसी प्रकार हरिदास ने कहा है—

विशिष्टशब्दरूपस्य काव्यस्यात्मा चमत्कृतिः।[1]

गुणयुक्त शब्द रूप काव्य की आत्मा चमत्कार है? इसके बाद अनेक आचार्यों में अपने-अपने काव्यलक्षणों में चमत्कार पद को समाविष्ट करने की दौड़-सी लग गई। इन काव्यलक्षणों में चमत्कार पद का समावेश हो जाने से चमत्कार-सम्प्रदाय प्रतिष्ठित हो गया है और अब इसको पृथक् सम्प्रदाय के रूप में मान्यता प्राप्त होने लगी है। उपर्युक्त छः सम्प्रदायों में इस सातवें चमत्कार-सम्प्रदाय को सम्मिलित करने पर काव्यशास्त्र के काव्यसम्प्रदायों की कुल संख्या सात हो जाती है। यह सातवां सम्प्रदाय अन्य सम्प्रदायों की तुलना में सर्वाधिक महत्त्वपूर्ण है। इसमें अन्य रसादि सम्प्रदायों का अन्तर्भाव हो जाता है। समय-समय पर उत्तरवर्ती आचार्यों ने चमत्कार को अन्य रसादि तत्त्वों का सार बताया है। परिकर श्लोक इस प्रकार है—

रसे सारश्चमत्कारो रीतौ सारश्चमत्कृतिः।
ध्वनौ सारश्चमत्कारः सोऽलङ्कारेऽपि तिष्ठति ॥

औचित्य सम्प्रदाय का आचार्यों और समीक्षकों के द्वारा अन्य सम्प्रदायों में अन्तर्भाव कर दिया जाता है। वक्रोक्ति भी चमत्कारकारिणी उक्ति होने के कारण चमत्कार के भीतर समा जाती है। इस प्रकार चमत्कार सम्प्रदाय में अन्य सम्प्रदायों का समावेश हो जाने के कारण चमत्कार का वर्चस्व अन्य सब तत्त्वों की तुलना में अधिक हो जाता है। चमत्कारसम्प्रदाय का दूसरे सम्प्रदायों में अन्तर्भाव नहीं हो सकता क्योंकि दूसरे तत्त्व इसकी अपेक्षा छोटे पड़ जाते हैं। चमत्कारसिन्धु में अन्य सम्प्रदायों के विचार-बिन्दुओं का अन्तर्भाव तो सम्भव है किन्तु उन विचार-बिन्दुओं में इस सिन्धु प्रवाह का अन्तर्भाव नहीं हो सकता।

---

१. काव्यालोक—डा० वी० राघवन स्टडीज़ ऑन सम कन्सेप्ट्स ऑफ दी अलङ्कारशास्त्र, १९४२, पृ० २७०.

चमत्कारसमर्थक आचार्य

चमत्कारसमर्थक आचार्यों को दो श्रेणियों में विभाजित किया जा सकता है। प्रथम श्रेणी में भरत, भामह, वामन, आनन्दवर्धन और कुन्तक जैसे आचार्य हैं जिन्होंने चमत्कारतत्त्व का स्पर्श तो किया है किन्तु उसको पूरा पूरा महत्त्व नहीं दिया है। इसके विपरीत उन्होंने अपने अभीष्ट सम्प्रदाय का विशेष रूप से प्रतिपादन किया है। इस कारण उनका नाम तत्तत्सम्प्रदाय-विशेष के साथ जोड़ा जाता रहा है। चमत्कारसम्प्रदाय के अप्रत्यक्ष समर्थन करने के कारण उनकी गणना चमत्कारसम्प्रदाय के आचार्यों में नहीं की जा सकती। दूसरी श्रेणी में क्षेमेन्द्र, विश्वेश्वर कविचन्द्र, विश्वनाथदेव, हरिप्रसाद, पण्डितराजजगन्नाथ, छज्जूराम शास्त्री, वागीश्वरविद्यालङ्कार, डॉ० कृष्णकान्त चतुर्वेद तथा डॉ० रेवाप्रसाद जैसे आचार्य आते हैं जिन्होंने चमत्कार को अपनी कृतियों में न केवल महत्त्वपूर्ण स्थान दिया है अपितु इस सम्प्रदाय का प्रत्यक्ष रूप से प्रतिपादन एवं समर्थन किया है। मम्मटोत्तरकाल के अधिकांश आचार्यों ने चमत्कारसम्प्रदाय को अपना अधिक से अधिक समर्थन दिया है। काव्यप्रकाश और साहित्यदर्पण के टीकाकारों ने भी चमत्कारसम्प्रदाय को मान्यता दी है। वस्तुतः रस, अलङ्कारादि समस्त काव्यसामग्री काव्य में सौन्दर्य उत्पन्न करके चमत्कार का ही आस्वाद कराती है। इस कारण इन सभी सम्प्रदायों का समन्वय इस सम्प्रदाय में हो जाता है। इस लिये चमत्कारसम्प्रदाय संस्कृतकाव्यशास्त्र में पूर्वपरिगणित इन सम्प्रदायों की तुलना में अधिक सक्षम एवं व्यापक है। विभिन्न काव्यशास्त्रीय ग्रन्थों एवं टीकाओं के आलोचनात्मक एव तुलनात्मक अध्ययन करने से यही प्रतीत होता है कि प्रायः सभी आचार्यों ने किसी न किसी रूप में चमत्कारतत्त्व को अपनी कृतियों में स्थान दिया है। इस प्रकार चमत्कारतत्त्व का प्रत्येक सम्प्रदाय के साथ सीधा सीधा सम्बन्ध है। इस कारण यह सम्प्रदाय रस, ध्वनि आदि सम्प्रदायों के समकक्ष स्थान प्राप्त करने का अधिकारी तो है ही किन्तु इनसे अधिक ऊँचा स्थान भी इसको दिया जा सकता है।

चमत्कारसम्प्रदाय की वर्तमान स्थिति

आजकल विभिन्न विश्वविद्यालयों और संस्कृतविश्वविद्यालयों के अधीन शिक्षणसंस्थाओं में संस्कृतसाहित्य के काव्य, महाकाव्य, नाटक तथा काव्यशास्त्रीय ग्रन्थ पढ़ाये जाते हैं। काव्य और नाटकों पढ़ाते समय जब उनकी आलोचना की जाती है तो उनमें रस, अलङ्कार, रीति, गुण, दोष, प्रकृति चित्रण, नायकनायिकाभेद, सन्धि तथा कथासम्बन्धी घातप्रतिघात आदि के सम्बन्ध में विस्तारपूर्वक बताया जाता है। इसी प्रकार संस्कृतकाव्यशास्त्र के अध्ययन के समय रस, अलङ्कार, रीति, ध्वनि, वक्रोक्ति एवं औचित्य के सम्बन्ध में बड़ी बारीकी के साथ विवेचन किया जाता है। किन्तु इस काव्य और काव्यशास्त्र की चर्चा में चमत्कारतत्त्व और चमत्कारसम्प्रदाय का नाम तक नहीं लिया जाता। अन्य सम्प्रदायों के प्रवर्तकों और समर्थकों के नाम और विचार बहुत विस्तार के साथ बताये जाते हैं किन्तु इस सम्प्रदाय से सम्बद्ध आचार्यों के सम्बन्ध में कोई जानकारी नहीं दी जाती। पिछले एक दो दशकों से चमत्कारसम्प्रदाय के सम्बन्ध में कुछ शोधपत्र तो लिखे जाने लगे हैं और कुछ पुस्तकों में चमत्कार का नाम भी लिया जाने लगा है परन्तु इस दिशा में अभी और अधिक प्रयत्न करने की आवश्यकता है। अभी तक हमारी दृष्टि में कोई ऐसा ग्रन्थ नहीं देखने में आया है जिसमें चमत्कारसम्बन्धी विचारों का सर्वाङ्गीण एव विस्तृत विचार हो। अभी हाल ही में डॉ० कृष्णकुमार ने काव्यशास्त्रविमर्श नामक संस्कृत के काव्यशास्त्र के इतिहास ग्रन्थ में चमत्कारसम्प्रदाय के समर्थक विश्वेश्वर कविचन्द्र की चमत्कार-चन्द्रिका और विश्वनाथदेव के साहित्यसुधासिन्धु का समावेश किया है। उनके इस प्रयास से काव्यशास्त्र के समीक्षकों और अध्येताओं को चमत्कार के सम्बन्ध में जानने के लिए प्रेरणा प्राप्त होगी। यदि चमत्कार एवं चमत्कारसम्प्रदाय के सम्बन्ध में और अधिक लेख लिखे जायें और गोष्ठियाँ और सम्मेलन आयोजित की जायें तो चमत्कार एवं चमत्कारसम्प्रदाय को पठन पाठन और अनुसन्धान में समुचित स्थान मिलने लगेगा।

औचित्यजचमत्कार

आचार्य मम्मट के पूर्ववर्ती भरत, भामह, वामन, आनन्दवर्धन,

कुन्तक और क्षेमेन्द्र द्वारा प्रवर्तित सम्प्रदायों में रस, अलङ्कार, रीति, ध्वनि, वक्रोक्ति, औचित्य एवं चमत्कार तत्त्वों को काव्य की आत्मा अर्थात् काव्य के प्रधानतत्त्व के रूप में प्रतिष्ठापित किया गया था। इस युग के सभी आचार्यों ने प्रत्यक्षतया अथवा अप्रत्यक्षतया रसादितत्त्वों के साथ औचित्यतत्त्व का सम्बन्ध भी जोड़ा है। आचार्य आनन्दवर्धन ने वाच्य और वाचक (शब्दादि) की रसादिविषयक औचित्य की दृष्टि से जो योजना करना है उसी को महाकवि का मुख्य कर्म बताया है।[1] इसी प्रकार आचार्य क्षेमेन्द्र ने औचित्यविचारचर्चा में औचित्य को रससिद्धकाव्य का प्राण बताया है तथा उसे चमत्कारकारी भी कहा है।[2] इस प्रकार उन्होंने औचित्य को रस एवं चमत्कार दोनों के लिए उपयोगी माना है। क्षेमेन्द्र ने औचित्यविचारचर्चा में औचित्य के २७ भेद बताये हैं और उन्होंने इन्हें पदौचित्य और वाक्यौचित्यादि के नाम दिये हैं। उन्होंने चमत्कारविरहित कवि को कवि और चमत्काररहित काव्य को काव्य मानने से इनकार कर दिया है।[3] इस चमत्कारयुक्त काव्य के दस भेद माने हैं जिनमें शब्दगत, अर्थगत, शब्दार्थगत, अलङ्कारगत और रसगत चमत्कार भी सम्मिलित हैं।[4] इस प्रकार इन आचार्यों के दृष्टिकोण को सम्मुख रखते हुए यह आवश्यक हो जाता है कि रसादि तत्त्वों के साथ औचित्य और चमत्कार का भी समन्वय कर लिया जाए। ये रस अलङ्कारादितत्त्व औचित्य की सहायता से काव्य में चमत्कार को उत्पन्न कर देते हैं। इस प्रकार रसौचित्य और अलङ्कारादि के औचित्य चमत्कार के साथ जन्यजनक भाव

---

१. वाच्यानां वाचकानाञ्च यदौचित्येन योजनम्।
रसादि विषयेणैतत् कर्म मुख्यं महाकवेः॥
(ध्वन्यालोक ३ ३२)

२. औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना॥
(औचित्यविचारचर्चा कारिक ३)

३. न हि चमत्कारविरहितस्य कवेः कवित्वं काव्यस्य वा काव्यत्वम्।
चमत्कारविचारचर्चा ३. १ वृत्ति

४. कविकण्ठाभरण ३. २ वृत्तिभाग)।

सम्बन्ध है। पहले काव्यतत्त्व जनक हैं और चमत्कार जन्य हैं। इस आधार पर काव्यगत औचित्यजचमत्कार के निम्नलिखित दस भेद किये जा सकते हैं—

(१) रसौचित्यजन्यचमत्कार
(२) अलङ्कारौचित्यजन्यचमत्कार
(३) गुणौचित्यजन्यचमत्कार
(४) रीत्यौचित्यजन्यचमत्कार
(५) ध्वन्यौचित्यजन्यचमत्कार
(६) वक्रोक्त्यौचित्यजन्यचमत्कार
(७) पदाद्यौचित्यजन्यचमत्कार
(८) क्रियाद्यौचित्यजन्यचमत्कार
(९) विभावाद्यौचित्यजन्यचमत्कार
(१०) ज्ञातवृत्तौचित्यजन्यचमत्कार

इन भेदों के अतिरिक्त अन्य भेद भी किए जा सकते हैं उदाहरणार्थ— वृत्तौचित्यजन्यचमत्कार (छन्दः शास्त्रानुपालनजन्यचमत्कार) एवं कविसमयौचित्यजन्यचमत्कार (कविख्याति के उत्पन्न चमत्कार) इत्यादि शब्दार्थरूप काव्यशरीर में रहने वाला चमत्कार आत्मा है। औचित्य प्राण है और रसादि प्रमुख तत्त्व लिङ्ग शरीर हैं—यह इस विवेचन का सारांश है।

चमत्कारविचारचर्चा परिचय

इस लघु पुस्तिका में १६५ कारिकाएं हैं। इनको मङ्गलाचरण अ मुख, काव्यहेतु आदि उपशीर्षकों में बाँट कर चमत्कार तत्त्व और चमत्कारसम्प्रदाय के स्वरूप को दिखलाया गया है। प्राचीन एवं अर्वाचीन आचार्यों के काव्यलक्षणों के आधार पर उन्हीं का अनुसरण करते हुए चमत्कारसम्प्रदाय को एक पृथक् एवं प्रमुखतम सम्प्रदाय के रूप में प्रतिष्ठित किया गया है।

चमत्कारविचारचर्चा नाम का महत्त्व

आचार्य क्षमेन्द्र ने काव्यशास्त्रसम्बन्धी दो प्रमुख लघुकृति लिखी हैं— (१) औचित्यविचारचर्चा एवम् (२) कविकण्ठाभरणम् औचित्यविचारचर्चा में औचित्यसम्प्रदाय का प्रतिपादन है तो कविकण्ठाभरण में चमत्कारसम्प्रदाय का। आधुनिक काव्यशास्त्र के समीक्षक क्षेमेन्द्र प्रतिपादित औचित्यसम्प्रदाय को तो छः

काव्यसम्प्रदायों में स्थान देते हैं किन्तु कविकण्ठाभरण में प्रतिपादित चमत्कारसम्प्रदाय की काव्यसम्प्रदायों में गणना ही नहीं करते। इसका प्रमुख कारण है कि कविकण्ठाभरण को तृतीय सन्धि के प्रथम श्लोक के नीचे क्षेमेन्द्र ने—

न हि चमत्काररहितस्य कवेः कवित्वं काव्यस्य वा काव्यत्वम्।

यह छोटी सी पंक्ति लिखी है। इसमें सारा चमत्कारसिद्धान्त सूत्र रूप में समाहित है। उसके बाद क्षेमेन्द्र ने दशविध चमत्कार और उसके भेद विस्तार से दिखाये हैं। यदि वे अपनी कृति का नाम कविकण्ठाभरण के स्थान पर चमत्कारविचारचर्चा लिखते तो चमत्कारसिद्धान्त की प्रसिद्धि के साथ साथ आचार्य क्षेमेन्द्र का नाम भी प्रसिद्ध होता। क्षेमेन्द्र के परवर्ती विश्वेश्वर कविचन्द्र ने अपनी कृति का नाम चमत्कारचन्द्रिका रखा है। आचार्य क्षेमेन्द्र की औचित्यविचारचर्चा के नाम का अनुकरण करते हुए प्रस्तुत कृति के कारिकाकार ने अपनी कृति का नाम चमत्कारविचारचर्चा रखा है। यद्यपि क्षमेन्द्र को चमत्कारसम्प्रदाय का प्रवतक बताया है किन्तु क्षमेन्द्र तो उपलक्षण हैं वस्तुतः इस सम्प्रदाय के प्रवर्तक आचार्य आनन्दवर्धन, आचार्य अभिनवगुप्त और आचार्य क्षेमेन्द्र तीनों ही हैं क्योंकि इन तीनों के द्वारा निर्मित, ध्वन्यलोक, लोचनटीका और कविकण्ठाभरण के आधार पर औचित्यजन्य-चमत्कार प्रधाना नई समीक्षापद्धति को आविष्कृत करने का विनम्र प्रयास किया गया है।

चमत्कारविचारचर्चा में १६५ कारिकाएं हैं। इनको तीन विचारों में बाँटा गया है। प्रथम विचार में मङ्गलाचरण, आमुख, काव्यप्रयोजन और काव्यहेतु का प्रतिपादन करते हुए चमत्कार-महत्त्व प्रदर्शित किया है। द्वितीय विचार में चमत्कारलक्षण, कविगुणाख्यान, समीक्षकमहिमा, काव्यलक्षण और काव्यभेद उदाहरण सहित दिखाये हैं। तृतीय विचार में चमत्कारसम्प्रदाय, चमत्कारसम्प्रदायवैशिष्ट्य औचित्यजन्यचमत्कार एवम् उपसंहार हैं। इस प्रकार प्राचीन, नवीन और अति नवीन आचार्यों द्वारा प्रस्तुत किये काव्यलक्षणों के आधार पर उन्हीं का अनुसरण करते हुए चमत्कारसम्प्रदाय को एक पृथक् एवं प्रमुखतम सम्प्रदाय के रूप में प्रतिष्ठित किया गया है।

चमत्कारविचारचर्चा[1]

प्रथमो विचारः

प्रारिप्सितपरिसमाप्तिकामः कारिकाकारः सर्वप्रथमं मङ्गलमाचरति—

चमत्कारजसंसारश्चमत्कारः स्वयं ह्यसौ ।
व्याप्य च तच्चमत्कारञ्चमत्कर्ता प्रभुः स्थितः ॥ १ ॥

उन्मज्जन्ति निमज्जन्ति चमत्कारे चराचराः ।
चमत्कारोद्भवं सर्वं चमत्कारे निलीयते ॥ २ ॥

चकचकश्चमत्कारश्चमत्कृत्य चकास्ति यः ।
तत्प्रभावानुभावैश्च भवन्ति चकिता जनाः ॥ ३ ॥

प्रणम्य तच्चमत्कारं याचेऽहं विमलां मतिम् ।
आलोचनवशां सूक्ष्मां गुरूणामाशिषस्तथा ॥ ४ ॥

आचार्याणां कवीनाञ्च मानसेषु या तिष्ठति ।
स्तूयते सा गिरां देवी नानार्थानां प्रकाशिका ॥ ५ ॥

आमुखम्—

दुर्गमः शास्त्रकान्तारः स्वल्पा मम गतिर्मतिः ।
तथाप्यत्र प्रवेशार्थं दुःसाहसं कृतं मया ॥ ६ ॥

यथाशक्ति करिष्यामि चमत्कारविवेचनम् ।
सर्वं ज्ञातुं प्रवक्तुञ्च ब्रह्मणाऽपि न शक्यते ॥ ७ ॥

प्राक्तनैर्नूतनाचार्यैः प्राक् पश्चाद् या च चर्चिता ।
चमत्कारविचाराणां चर्चा सैवात्र चर्च्यते ॥ ८ ॥

---

१. क्षेमेन्द्रकृतौचित्यविचारचर्चानामसाम्येनैतन्नाम गृहीतम् ।

चमत्कारप्रयोजनम्—

काव्यस्य श्रुतिना रङ्गरूपकदर्शनेन वा ।
चमत्कारस्य चक्येन चित्तं द्रवति सत्वरम् ॥ ९ ॥

ततो यो जायते ह्लादः भावुकेनानुभूयते ।
आनन्दानुभवः सैव चमत्कारप्रयोजनम् ॥ १० ॥

चमत्कारहेतुः—

शक्तिनिपुणताभ्यासैर्विशिष्टैः काव्यहेतुभिः ।
कविना तन्यते काव्यं चमत्कारसुवासितम् ॥ ११ ॥

प्रज्ञा सा प्रतिभा प्रोक्ता नवोन्मेषणशालिनी ।
या स्फुरणात्मिको भूत्वा व्यनक्ति तां चमत्कृतिम् ॥ १२ ॥

न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः ।
तदभावे च न भूयात्काव्यनिर्माणसम्भवः[1] ॥ १३ ॥

शक्तिजाच्च चमत्कारात् सर्वोऽप्यर्थः प्रवर्तते ।
एतत्सम्पर्कमासाद्य काव्यं काव्यमुदीर्यते ॥ १४ ॥

शक्तिव्युत्पत्त्यभावे यच्छब्दानां विनियोजनम् ।
प्रक्लिष्टार्थकमेतन्न काव्यं सूरिभिरुच्यते[2] ॥ १५ ॥

---

१. ध्वनेरित्थं गुणीभूतव्यङ्ग्यस्य च समाश्रयात् ।
न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभागुणः ॥

सत्स्वपि पुरातनकविप्रबन्धेषु यदि स्यात् प्रतिभागुणः । तस्मिंस्त्वसति न किञ्चिदेव कवेर्वस्त्वस्ति । (ध्वन्यालोकः ४, ६ तथा वृत्तिः)

२. यत्र प्रतीयमानोऽर्थः प्रम्लिष्टत्वेन भासते ।
वाच्यस्याङ्गतया वापि नास्त्यसौ गोचरो ध्वनेः ।
अव्युत्पत्तेरशक्तेर्वा निबन्धो यः स्खलद्गतेः ।
शब्दस्य स च न ज्ञेयः सूरिभिर्विषयो ध्वनेः ॥
(ध्वन्यालोकः, २. ३१-३२)

अव्युत्पत्तिभवो दोषः शक्त्यैवाव्रियते कवेः ।
किन्त्वशक्तिकृतो दोषः शीघ्रमेव प्रतीयते[1] ॥ १६ ॥

व्युत्पत्त्यभ्यासवैयर्थ्यं को लाभः शब्दलीलया ।
काव्ये यदि मनाङ् नास्ति प्रतिभा सा चमत्करी ॥ १७ ॥

कविशक्त्याः समुद्भूतं कौतुकगन्धसमन्वितम् ।
चमत्कारसमाकीर्णं काव्यं कस्मै न रोचते ॥ १८ ॥

सूक्तिर्गीतञ्च वाद्यं च लीलाश्च कान्तकान्तयोः ।
काव्यास्वादकरं सर्वं प्रातिभी प्रस्तुतिर्यदि ॥ १९ ॥

चमत्कारमयीं वाचं तदन्वितञ्च रूपकम् ।
श्रुत्वा दृष्ट्वा न हृष्यन्ति काष्ठकुड्यनिभा जनाः ॥ २० ॥

प्रतिभैव कवीनां साऽनर्घमाभरणं मतम् ।
तद्युक्तोऽकविः प्रोक्तस्तद्युक्तश्च महाकविः ॥ २१ ॥

चमत्कारकारिकविमहिमा—

महिमानं कवेर्वक्ष्ये चमत्कारप्रियोऽस्ति यः ।
स ह्लादैकमयीं सृष्टिं विधत्ते रुचिरां पराम् ॥ २२ ॥

निर्मीयते कुलालेन मृदा पात्रं मनोहरम् ।
कविना क्रियते पात्रं पदैरतिशयान्वितम् ॥ २३ ॥

काव्यसारं चमत्कारं स्वकृतौ निदधाति यः ।
कविपदमवाप्नोति कीर्तिमप्यतिभूयसीम् ॥ २४ ॥

बाह्यं जगदिदं तावद् द्योतते द्युतिना रवेः ।
भवत्यन्तर्जगद् दीप्तं महसा भूयसा कवेः ॥ २५ ॥

---

१. अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यत्त्वशक्तिकृतस्तस्य स झटित्यवभासते ॥
(तत्रैव, ३. ६ वृत्तिः)

चमत्कारप्रधानस्य स्रष्टा काव्यस्य यः कविः ।
जायते तत्प्रभावेण चमत्कारमयं जगत् ॥ २६ ॥

विभावादिसमुत्पन्नं समूहालम्बनात्मकम् ।
निष्पादयति यो ज्ञानं रसनिष्पत्तिहेतुकम् ॥ २७ ॥

आस्वादयति ततस्तावत् काव्यस्वादं विलक्षणम् ।
चमत्कारान्विते काव्ये स कविर्जयतेतराम् ॥ २८ ॥

पठित्वा विविधां विद्यां शास्त्राभ्यासं करोति सः ।
काव्योद्यानमधुग्राहे भ्राम्यति भ्रमरो यथा ॥ २९ ॥

गुरुसान्निध्यसम्प्राप्तः स्थिरचित्तः श्रमी कविः ।
विदधाति स सत्काव्यं नानारससमन्वितम् ॥ ३० ॥

साहचर्यं कविवरैः (श्रेष्ठैः) महाकाव्यार्थचर्वणम् ।
सुजनैः सह मित्रत्वं सौमनस्यं सुवेशता ॥ ३१ ॥

सदा स्वकाव्यव्याख्यानं वैरमत्सरवर्जनम् ।
परोन्मेषजिगीषा च व्युत्पत्त्यै सर्वशिष्यता ॥ ३२ ॥

वैदग्ध्यं पटुता भङ्गिः निःसङ्गैकान्तनिर्वृतिः ।
आशापाशपरित्यागः सन्तोषः सत्त्वशीलता[1] ॥ ३३ ॥

कविशिक्षेयमुक्तानुक्षेमेन्द्रेण पुरा शुभा ।
कविरेतामनुसरन् करोति काव्यमुत्तमम् ॥ ३४ ॥

इति चमत्कारविचारचर्चायां प्रथमो विचारः ॥

द्वितीयो विचारः

चमत्कारलक्षणलक्ष्याणि—

अथेदानीं चमत्कारो लक्षणेनात्र लक्ष्यते ।
अस्य व्युत्पत्तिमाश्रित्य प्रवृत्तिञ्च समासतः ॥ ३५ ॥

---

१. कविकण्ठाभरणम्, १.४; १४; १७.

चमत्करोति यः काव्ये चमत्कारः स उच्यते ।
आस्वादयति काव्यार्थान् सामाजिकस्य चेतसि ॥ ३६ ॥

विस्मयापरपर्यायः काव्यास्वादकरो हि यः ।
कौतुकात्सः समुद्भूतः कुतूहलविवर्धकः ॥ ३७ ॥

सुखरूपश्चमत्कारश्चित्तविस्तारको हि सः ।
सर्वरससमाकीर्णः काव्यशोभाविवर्धकः ॥ ३८ ॥

वर्णनाऽलौकिकी यत्र कविस्फुरणसूचिका ।
कवेः तन्निपुणं कर्म रसादिभिश्च पेशलम् ॥ ३९ ॥

चमत्कारसमाकीर्णं चित्तस्य द्रुतिकारणम् ।
काव्यं याति चमत्कारकाव्याभिधानतां प्रियाम् ॥ ४० ॥

नानाविधैर्गुणैर्युक्तं नानाभावसमाकुलम् ।
चमत्काराहितं काव्यं सर्वैरेव प्रशस्यते ॥ ४१ ॥

अस्य बहुविधं लक्ष्यं सर्वत्रैवोपलभ्यते ।
कृतिषु काव्यशास्त्रस्य कवीनां रचनासु च ॥ ४२ ॥

शून्ये वासगृहे बाला पतिं कामयते भृशम् ।
वर्धते च तयोर्मध्ये रतिश्चुम्बनकर्मणा[1] ॥ ४३ ॥

परां पुष्टिङ्गता सैव रसतामेति सत्वरम् ।
परिपुष्टः सशृङ्गारश्चमत्कारस्य कारणम् ॥ ४४ ॥

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः[2] ॥ ४५ ॥

---

१. शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैर्निद्रा व्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्यगण्डस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ (साहित्यदर्पण १. ३ वृत्ति)

२. ध्वन्यालोक १. १२ वृत्ति ।

समासोक्त्याद्यलङ्कारैः शृङ्गाररससम्पदा ।
अङ्गीभूतश्चमत्कारः पुष्टिमत्राधिगच्छति ॥ ४६ ॥

राघवविरहज्वाला सह्याद्रिं तपते भृशम् ।
सीताकुशलवृत्तेन सा शान्तिमधिगच्छति[1] ॥ ४७ ॥

कोपहेतुश्च सम्भूता वानराणां कपिं प्रति ।
कथावस्तुचमत्कारः योऽसौ प्रीतिं प्रयच्छति ॥ ४८ ॥

भ्रम धार्मिक विश्वस्तः क्षुद्रः स श्वाद्य मारितः ।
तेन दृप्तेन सिंहेन गोदानदीनिवासिना[2] ॥ ४९ ॥

यो भ्रमणनिषेधार्थो ध्वनिनाऽत्रावगम्यते ।
चमत्कारं जनयति स बुधानन्ददायकम् ॥ ५० ॥

राकायामकलङ्कं चेदमृतांशोर्भवेद् वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात्[3] ॥ ५१ ॥

शृङ्गाररससम्पृक्ताऽतिशयोक्तिरसौ स्थिता ।
व्यतिरेकेण सार्धं सा चमत्कारस्य कारणम् ॥ ५२ ॥

चमत्कारस्य महत्त्वम्—

महत्त्वं कीर्त्यते चात्र चमत्कारस्य भूयसा ।
लोकोत्तरस्वरूपस्य गिरामविषयस्य च ॥ ५३ ॥

---

१. राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु ।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥
(रसगङ्गाधरः, १. १ वृत्तिः)

२. भ्रम धार्मिक विश्वस्तः स श्वाद्य मारितस्तेन ।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥
(काव्यप्रकाशः, ५. ४७ वृत्तिः)

३. काव्यप्रकाशः, १०. ४५२.

ऋचो मन्त्राश्च वेदानां शास्त्राणि निखिलानि वै ।
अजायन्त चमत्कारात्तस्माद् वै शब्दरूपिणः ॥ ५४ ॥

चमत्कारस्य दीप्तिर्या तया दीप्तं जगत् तथा ।
भानोर्भासा च भातीदं भावनं भुवनं यथा ॥ ५५ ॥

एतावदस्य माहात्म्यमेतावान् महिमा मतः ।
मानयन्त्रेण तत्केन मातुं शक्नोति को नरः ॥ ५६ ॥

येनाभिव्यज्यते काव्येऽलौकिकी चारुचर्वणा ।
चमत्कारः स विद्वद्भ्यः परां प्रीतिं प्रयच्छति ॥ ५७ ॥

भूषणं कविकण्ठानां चमत्कारो निगद्यते ।
सुगन्धा पुष्पमालेव ग्रीवामध्ये विराजते ॥ ५८ ॥

चारुचर्वणकाव्ये यश्चमत्कारोऽनुभूयते ।
सुखान्तरातिशायी स भवत्यतिविलक्षणः ॥ ५९ ॥

उपेक्षा नैव कर्तव्या चमत्कारस्य कर्हिचित् ।
उच्चावचविवेकस्तु बुधैः सर्वैरपेक्ष्यते ॥ ६० ॥

तिष्ठति सर्वभूतानां हृदयेष्वीश्वरो यथा ।
चमत्कारस्तथा विद्वच्चित्तभूमौ विराजते ॥ ६१ ॥

यथा धर्मपरैर्लोकैः पराशक्तिरुपास्यते ।
चमत्कृतिस्तथा नित्यं विबुधैः सेव्यतेतराम् ॥ ६२ ॥

चमत्कारविहीनेन कविकीर्त्यपहारिणा ।
किं कुर्मस्तेन काव्येन येन चित्तं न रञ्जितम् ॥ ६३ ॥

काव्यं स्यात्तदकाव्यं यच्चमत्कारेण वञ्चितम् ।
चन्द्रे गते सदा दृष्टमन्तरिक्षं मलीमसम् ॥ ६४ ॥

चमत्कारगुणं प्राप्य काव्यं तावद् विशिष्यते ।
अचमत्कारदोषेण निन्दां तल्लभते पराम् ॥ ६५ ॥

विलोकयति कान्तेति प्रीतिकरमिदं वचः ।
पश्यति स्त्रीति वाक्येन पराग्लानिः प्रजायते ।। ६६ ।।

चमत्कारवियोगे तु काव्यस्य काव्यता गता ।
तस्य च स्पर्शमात्रेण भवति सा पुनरागता ।। ६७ ।।

चर्वणीयश्चमत्कारश्चास्वाद्यैषा चमत्कृतिः ।
भोग्योऽयन्नु चमत्कारः सामाजिकाश्च भोगिनः ।। ६८ ।।

चमत्कारकृतानन्दं स्वदन्ते रसिका जनाः ।
पुष्परसान् पिबन्ति वै मधुपामधुमक्षिकाः ।। ६९ ।।

पुण्यवन्तः प्रमिण्वन्ति विदग्धास्तञ्च केचन ।
साक्षाद्बुधि ब्रह्म पश्यन्ति योगिन एव केवलम् ।। ७० ।।

स्थाने सम्यक्प्रयुक्तं तच्चमत्कारमयं वचः ।
लगति तत्तु हृद्देशं क्षिप्तो बाणो रणे यथा ।। ७१ ।।

निरूपमगुणोपेतः वाग्विशेषैश्च संयुतः ।
सैष भव्यश्चमत्कारो विद्वद्भ्यो बहु रोचते ।। ७२ ।।

श्रावं श्रावं कवेः काव्यं दर्शं दर्शञ्च रूपकम् ।
पायं पायं रसान् तांश्च तृप्यन्ति विरला जनाः ।। ७३ ।।

वस्तुशब्दार्थसार्थेऽस्मिन् काव्ये भ्रमति सत्कविः ।
वाक्चमत्कारलोभो स वनान्तमधुपायते[1] ।। ७४ ।।

---

१. सुकविरतिशयार्थी वाक्चमत्कारलोभादभिसरति मनोज्ञे वस्तुशब्दार्थसार्थे ।
भ्रमर इव वसन्ते पुष्पकान्ते वनान्ते नवकुसुमविशेषामोदमास्वादलोलः ।।
एकेन केनचिदनर्घमणिप्रभेण काव्यं चमत्कृतिपदेन विना सुवर्णम् ।
निर्दोषलेशमपि रोहति कस्यचित्ते लावण्यहीनमिव यौवनमङ्गनानाम् ।।
इत्युक्त एष सवि-शेषचमत्कृतीनां सारः प्रकारपरभागविभाव्यमानः ।
कर्पूरवेध इव वाग्मधुगन्धयुक्ते-चैत्रासवस्य सहकाररसाधिवासः ।

वाराङ्गनाङ्गसौन्दर्यं सुवर्णं रत्नसङ्गतम् ।
चमत्कृतिमयं काव्यं कस्य चित्ते न रोहति ॥ ७५ ॥

चमत्कारस्य सङ्गेन काव्योत्कर्षः प्रकर्षते ।
सहकाररसो नूनमासवास्वादवर्धकः[1] ॥ ७६ ॥

चमत्कारो हि काव्यस्य शब्दार्थेषु तथा स्थितः ।
यथाङ्गनाङ्गमध्ये तल्लावण्यमधितिष्ठति[2] ॥ ७७ ॥

कवित्वशक्तिसम्पन्नो नैपुण्याभ्याससंयुतः ।
चमत्कारसमाहर्ता चमत्कारस्य चिन्तकः ॥ ७८ ॥

बहुभाषाविशेषज्ञो नैकशास्त्रविचक्षणः ।
अनासक्तो ह्याप्तकामो वीतरागो जितेन्द्रियः ॥ ७९ ॥

काव्यं तु कुरुते कश्चित् प्रतिभावान् महान् कविः ।
करोति शास्त्रनिर्माणं जडधीरपि शिक्षितः[3] ॥ ८० ॥

समीक्षकमहिमा—

कविः करोति सत्काव्यं तद् व्याख्याति समीक्षकः ।
काव्यगतश्चमत्कारो ह्यालोचकेन मृग्यते ॥ ८१ ॥

व्याख्याभावे तु काव्यस्य महत्त्वं केन वेद्यते ।
गुणदोषविवेकस्तु समीक्षयैव जायते ॥ ८२ ॥

लोचनेन विना यद्वत् पदार्थो न विभाव्यते ।
विनैवालोचनं तद्वत् काव्यार्थो नैव बुध्यते ॥ ८३ ॥

---

१. कविकण्ठाभरण ३, १-३

२. प्रतीयमानं पुनरन्यदेव, वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥
(ध्वन्यालोकः १. ४)

३. गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम् ।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः ॥
(भामहकृतकाव्यालङ्कारः, १. ५)

अम्बुमध्याद् यथा हंसैर्दुग्धं निष्कास्यते बहिः ।
तथा काव्याच्चमत्कारो गृह्यते तत्त्ववेतृभिः ॥ ८४ ॥

देलीदीपकन्याये स्थितो ह्यालोचनाप्रियः ।
दर्शयति निजां बुद्धिं दुर्लभांश्च गुणान् कवेः ॥ ८५ ॥

इति चमत्कारविचारचर्चायां द्वितीयो विचारः ॥

तृतीयो विचारः

चमत्कारसम्प्रदायप्रवर्तकः—

अस्ति कश्मीरभूमिर्या कुङ्कुमकाव्ययोः स्थली[1] ।
वसति शारदा यस्यां भारतमूर्ध्नि या स्थिता ॥ ८६ ॥

तस्यां जाता महीयांसः कवयः क्रान्तदर्शिनः ।
काव्यमर्मविदो विज्ञा आचार्याः काव्यशास्त्रिणः ॥ ८७ ॥

तत्र देशे समुत्पन्नः क्षेमेन्द्रोऽसौ महामतिः ।
मार्गं चमत्कृतेः पूर्वं प्रावर्तयत् प्रयत्नतः[2] ॥ ८८ ॥

ततस्तमन्वधावंस्ते मम्मटादिमनीषिणः ।
चमत्कारपथं प्राप्य ते कृतकृत्यातां गताः ॥ ८९ ॥

कविभिः काव्यशास्त्रज्ञैः प्रत्यक्षतः परोक्षतः ।
सर्वविधेषु काव्येषु चमत्कारस्थितिर्मता[2] ॥ ९० ॥

---

१. सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः ।
न शारदादेशमपास्य दृष्टस्तेषां तदन्यत्र मया प्ररोहः ॥
(विक्रमाङ्कदेवचरितम्, १. २१)

२. न हि चमत्काररहितस्य कवेः कवित्वं काव्यस्य वा काव्यत्वम् ।
(कविकण्ठाभरणम्, ३. १ वृत्तिभागः)

प्रशंसन्ति चमत्कारं चमत्कृतधियो हि ये ।
प्राचीनास्ते नवीनास्ते ह्यतिनवीनकोविदाः ॥ ९१ ॥

चमत्कारस्य सम्बन्धे पूर्वं न प्रतिपादितम् ।
विशिष्टं स्वमतं तैस्तु प्राक्तनैर्भरतादिभिः ॥ ९२ ॥

परं तद्विषये पश्चादाचार्यैः परवर्तिभिः ।
प्रत्यक्षतः स्फुटं प्रोक्तं क्षेमेन्द्रमम्मटादिभिः ॥ ९३ ॥

पूर्वं ह्रस्वास्ततो दीर्घा भवन्ति ये शनैः-शनैः ।
शास्त्राणां ते समारम्भाः प्रवाहाः सरितां यथा[1] ॥ ९४ ॥

एवमेष चमत्कारः सूक्ष्मरूपः पुराऽभवत् ।
विकासभावमासाद्य सम्प्रदायत्वमागतः ॥ ९५ ॥

रसालङ्कारवक्रोक्तिध्वनिरीतिसमाश्रिताः ।
सम्प्रदायाः पुरा पञ्च काव्यशास्त्रे प्रतिष्ठिताः ॥ ९६ ॥

चमत्कारः परं तेषां मध्ये स्थानमवाप नो ।
प्रभुत्वमन्यतत्त्वानामभवच्छास्त्रसम्मतम् ॥ ९७ ॥

क्षेमेन्द्रेण तदागत्य सूक्ष्मरूपेण संस्थितः ।
उपेक्षितश्चमत्कारः शास्त्रेऽस्मिन् सुप्रतिष्ठितः ॥ ९८ ॥

चमत्कारं स्थिरीकर्तुं रसालङ्कारवर्तिनम् ।
निष्कर्षत इदं प्रोक्तं वचस्तेन मनीषिणा ॥ ९९ ॥

कवेः तस्य कवित्वं नो नापि काव्यस्य काव्यता ।
नास्ति यत्र चमत्कारः काव्यसर्वस्वताङ्गतः[2] ॥ १०० ॥

---

१. सरितामिव प्रवाहास्तुच्छाः प्रथमं यथोत्तरं विपुलाः ।
ये शास्त्रसमारम्भा भवन्ति लोकस्य ते वन्द्याः ॥
(काव्यमीमांसा द्वितीयोऽध्यायः)

२. न हि चमत्काररहितस्य कवेः कवित्वं काव्यस्य वा काव्यत्वम् ।
(कविकण्ठाभरणम्, ३. १, वृत्तिः)

औचित्यं कारणं प्रोक्तं चमत्कारस्य तेन तत् ।
रसजीवितसम्भूतं यत् काव्ये चारुचर्वणे[1] ॥ १०१ ॥

काव्यलक्षणम्—

काव्यस्य लक्षणं प्रोक्तं बहुभिः कोविदैः पुरा ।
चमत्कारपदं नैतल् लक्षणे तैः समाहितम् ॥ १०२ ॥
सन्ति केचन विद्वांसश्चमत्कारपरायणाः ।
चमत्कारप्रधानं तैरुक्तं काव्यस्य लक्षणम् ॥ १०३ ॥
बुधैर्निगदितं तावच्चमत्कारसमन्वितम् ।
त्रिप्रकारकमेतत्तु प्रोच्यते काव्यलक्षणम् ॥ १०४ ॥
शब्दार्थौ सचमत्कारौ गुणालङ्कारभूषितौ ।
लोकोत्तरं तु तत् काव्यं प्राचां काव्यविदां प्रियम्[2] ॥ १०५ ॥

---

१. औचित्यस्य चमत्कारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥
(औचित्यविचारचर्चा कारिका ३)

अत्र चमत्कारिणः इति पदस्य द्वौ अर्थौ—चमत्कारयुक्तस्य चमत्कारकारिणश्च । द्वितीयमर्थं गृहीत्वा औचित्यं चमत्कारस्य कारणं मतम् ।

आचार्यमम्मटेन चमत्कारिपदस्य चमत्कारकारिपदस्य च प्रयोगो विहितः— ... वाच्यस्यैव चमत्कारित्वात् ।
(काव्यप्रकाशः, १. ५, वृत्तिः)

... अस्ति कश्चित् स्वरूपस्य विशेषो यश्चमत्कारकारी ... ...
(तत्रैव ४. ११० वृत्तिः)

२. (क) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।
(काव्यप्रकाशः, १. ४)

(ख) वागर्थौ सचमत्कारौ काव्यं काव्यविदो विदुः ॥
(चमत्कारचन्द्रिका प्रथमो विलासः, पृ० ३)

विशिष्टशब्दरूपस्य काव्यस्यात्मा चमत्कृतिः ।
प्राधान्यं यत्र शब्दस्य मतं नव्यैरिदं स्मृतम्[1] ॥ १०६ ॥

काव्यं स्फुरच्चमत्कारं ध्वन्यलङ्कारमण्डितम् ।
रसान्वितं सशब्दार्थमतिनव्यैः प्रशस्यते[2] ॥ १०७ ॥

छन्दोभिर्ललितैर्बद्धं भाषासौन्दर्यपूरितम् ।
काव्यं तदुत्तमं लोकैः स्वरैक्येन निगद्यते ॥ १०८ ॥

कविवाङ्निर्मितिः काव्यं निपुणं कविकर्म तत् ।
सबीजो हि कविर्ज्ञेयः सर्वागमकोविदः ॥ १०९ ॥

सरसः प्रतिभाशाली यदि स्यादुत्तमस्तदा[3] ।
भवति रचना त्वेषा चमत्कारेण सम्प्लुता[4] ॥ ११० ॥

रसभावचमत्कारान्यतमप्राणपेशलः ।
काव्यं शब्दार्थसन्दर्भोऽलौकिकानन्दसुन्दरः ॥ १११ ॥

सगुणालङ्कृतिः प्रोक्तं यथा दोषैस्तथा न सः ।
रसवर्णानुरूपा च रीतिस्तत्रोपकारिणी[5] ॥ ११२ ॥

---

१. विशिष्टशब्दरूपस्य काव्यास्यात्मा चमत्कृतिः ।
उत्पत्तिभूमिः प्रतिभा मनागत्रोपपादितम् ॥
हरिप्रसादकृतकाव्यालोकः डॉ० वी० राघवन् स्टडीज ऑफ सम कन्सेप्शन्स आफ अलङ्कारशास्त्र, पृ० २७०.

२. पण्डितराजजगन्नाथछज्जूरामप्रभृतयः आचार्याः अतिनव्याः ॥

३. अलङ्कारकौस्तुभः, १. २-३.

४. असाधारणचमत्कारकारिणी रचना हि निर्मितिः तदेव १. ३ वृत्तिः ।

५. ... किञ्च, स शब्दार्थसन्दर्भः काव्यमुच्यते यो रसभावचमत्कारान्यतमप्राणपेशलः स्यात् ।
रसाः शृङ्गारादयः । भावा देवादिविषयकरत्यादिरूपा वक्ष्यमाणाः । चमत्कारः शब्दार्थालङ्कारादीनां कुशलप्रयोगजन्या चित्तचमत्कृतिः ।

चाकचक्यं विधत्ते यः सहृदयस्य चेतसि ।
चितिरूपश्चमत्कारः काव्यसर्वस्वमुच्यते[1] ॥ ११३ ॥

चमत्कारकाव्यभेदाः—

त्रयो भेदास्तु काव्यस्य चमत्कारसमाश्रिताः ।
विश्वेश्वरेण देवेन विश्वनाथेन च स्मृताः ॥ ११४ ॥
शब्दार्थरूपकाव्यं तत् तावच्छब्दार्थकोविदैः ।
त्रैविध्येन चमत्कारि चमत्कारितरं यथा ॥ ११५ ॥
चमत्कारितमं चेति प्रविविच्य निर्दशितम् ।
शब्दचारुत्वतात्पर्ये चमत्कारीति कथ्यते ॥ ११६ ॥
वाच्यचारुत्वतात्पर्ये चमत्कारितरं मतम् ।
व्यङ्ग्यस्य च गुणीभावे तदेवाहुर्मनीषिणः ॥ ११७ ॥
प्रत्येयार्थचारुत्वे चमत्कारितमं मतम् ।
गद्यं पद्यं च मिश्रञ्चेत्येतत्सर्वं त्रिधा स्मृतम्[2] ॥ ११८ ॥

एतेषामन्यतमः कोऽपि प्राणाः प्राणप्रदधर्मा इव तैः पेशलः ।
चमत्कारकथनात् रसादिरहितायाः अपि सहृदयाह्लादकारिण्या रचनायाः काव्यत्वं प्रतिपादितम् ।

वागीश्वरकृतवैदिकसाहित्यसौदामिनी २. ७-८ तथा वृत्तिः ।

१. विद्युत्समुन्मेष इवान्धकारे करोति या चेतसि चाकचक्यम् ।
वक्रोक्तिवैचित्र्यविरोधिताद्यैश्चितिश्चमत्कारपदोदिताऽसौ ॥

काव्यं पठतो रूपकं वा पश्यतः सहृदयस्य सङ्कल्पविकल्पात्मके मनसि सम्भावनातीतस्य कस्यचिदर्थस्य सहसाऽऽलादात्मिका चितिः प्रकाश एव चमत्कारः । कल्पनाप्रधानम् उक्तिवैचित्र्यात्मकम् विरोधगर्भम् विविधालङ्कारैरुपस्कृतं चित्रं काव्यं स्ववैलक्षण्येन चित्तं यथा चमत्करोति न तथा रसकाव्यम् ।

(वैदिकसाहित्यसौदामिनी २. ३ तथा वृत्तिः)

२. विश्वेश्वरकविचन्द्रकृतचमत्कारचन्द्रिका, पृ० ७३-७४; ७७-७८.

यत्र व्यङ्ग्यचमत्कारो वाच्याधिकतरो भवेत् ।
ध्वनिकाव्यमिदं प्राहुः पारिभाषिकमुत्तमम् ॥ ११९ ॥

वाच्याधिकचमत्कारि व्यङ्ग्यं यत्र न भासते ।
तदेव मध्यमं काव्यं कविवृन्दैर्निगद्यते ॥ १२० ॥

अलङ्कारकृतानन्दसन्दोहो यत्र जायते ।
चित्रं शब्दार्थभेदेन द्विधा तत् परिकीर्तितम्[१] ॥ १२१ ॥

शब्दार्थयोरलङ्काराश्चमत्कारेण संयुताः ।
काव्यपदं समायान्ति यमकरूपकादयः[२] ॥ १२२ ॥

दशविधश्चमत्कारः क्षेमेन्द्रप्रतिपादितः ।
दृष्टिविषयतां याति कवीनां कण्ठभूषणे[३] ॥ १२३ ॥

प्रदर्शितानि लक्ष्याणि तेन तत्र चमत्कृतेः ।
तस्या अलौकिकं सर्वं स्वरूपं विशदीकृतम् ॥ १२४ ॥

चमत्कारसम्प्रदायवैशिष्टयम् —

सैव गोष्ठी मता यत्र कविराजो विराजते ।
कविराजस्तु स प्रोक्तः सूक्तमाह च यः सुधीः ॥ १२५ ॥

तदुक्तं नु ध्वनिर्यत्र सैव ध्वनिर्ध्वनिर्मतः ।
क्षिप्रं सचेतसश्चित्ते सूते यस्तु चमत्क्रियाम् ॥ १२६ ॥

---

१. साहित्यसुधासिन्धुः, १. ५-७.

२. शब्दालङ्कारचमत्कारि यथा… …अर्थालङ्कारचमत्कारि यथा……
अत्र चोत्प्रेक्षा चमत्कारिणी । अत्रोभयत्र सूर्यराजविषयकभाव-सत्त्वेऽप्यनुप्रासोत्प्रेक्षे चमत्कारहेतू । (तत्रैव १. ७ वृत्तिः)

३. तत्र दशविधश्चमत्कारः—अविचारितरमणीयः, विचार्यमाणरमणीयः, समस्तसूक्तव्यापी, सूक्तैकदेशदृश्यः, शब्दगतः, अर्थगतः, शब्दार्थगतः, अलङ्कारगतः, रसगतः, प्रख्यातवृत्तिगतश्च ।
(कविकण्ठाभरणम्, ३. २ वृत्तिः)

काव्यपुरुषदेहे स आत्मरूपेण संस्थितः ।
करोति परमां प्रीतिं ब्रह्मानन्दसहोदरीम् ॥ १२७ ॥

काव्यसारश्चमत्कारः काव्यं व्यर्थं च तं विना ।
रसहीनं फलं तावद् भुज्यते नैव केनचित् ॥ १२८ ॥

अचमत्कारि काव्यं तु काव्येषु नैव गण्यते ।
निर्गतात्मा तु यो देहः शवसञ्ज्ञां प्रयाति सः ॥ १२९ ॥

समायान्ति तथा यान्ति रसालङ्काररीतयः ।
स्थिरीभूते चमत्कारे कल्लोला इव वारिधौ ॥ १३० ॥

तत्त्वान्तराणि काव्ये तु भवन्तु न भवन्तु वा ।
विस्मयगर्भश्चमत्कारः स्थिरं काव्यस्य जीवितम् ॥ १३१ ॥

कामं सन्तु रसास्तस्मिन्नलङ्काराश्च भूरिशः ।
उपयाति न पूर्णत्वं चमत्कारं विना तु तत् ॥ १३२ ॥

स एव काव्यजीवातुः काव्यस्य प्राणनं तथा ।
तेनैव सारता तस्य तं विना सारहीनता ॥ १३३ ॥

चमत्कारात्मके काव्ये तदङ्गानि रसादयः ।
अङ्गीभूयोपकुर्वन्ति पुष्णन्ति तञ्च सर्वदा ॥ १३४ ॥

लिङ्गशरीरमेतेषां तत्त्वानां सहवर्तिनाम् ।
उपस्कारकभूतानां चमत्कारात्मनि स्थितम् ॥ १३५ ॥

यथा महानदाः सर्वे गच्छन्ति सागरं प्रति ।
निखिलाः सम्प्रदायास्ते चमत्कारं तथा गताः ॥ १३६ ॥

रसे सारश्चमत्कारो रीतौ सारश्चमत्कृतिः ।
ध्वनौ सारश्चमत्कारः सोऽलङ्कारेऽपि वर्तते ॥ १३७ ॥

रससारश्चमत्कारस्तं विना न रसो रसः ।
सैव सारो ध्वनेश्चापि तं विना न ध्वनिर्ध्वनिः ॥ १३८ ॥

न तिष्ठन्ति विना तेन गुणालङ्काररीतयः ।
एवमस्य मता काव्येऽचला चावश्यिकी स्थितिः ॥ १३९ ॥